# 5 – अथ पञ्चम दशकम्
## ॥ विराट्पुरुषोत्पत्तिः ॥

व्यक्ताव्यक्तमिदं न किंचिदभवत् प्राक् प्राकृतप्रक्षये
मायायां गुणसाम्यरुद्धविकृतौ त्वय्यागतायां लयम् ।
नो मृत्युश्च तदामृतं च समभून्नाह्नो न रात्रेः स्थितिः
तत्रैकस्त्वमशिष्यथाः किल परानन्दप्रकाशात्मना ॥ (5.1)

कालः कर्मगुणाश्च जीवनिवहा विश्वं च कार्यं विभो!
चिल्लीलारतिमेयुषि त्वयि तदा निर्लीनतामाययुः ।
तेषां नैव वदन्त्यसत्वमयि भोः! शक्त्यात्मना तिष्ठतां
नो चेत् किं गगनप्रसूनसदृशां भूयो भवेत् सम्भवः ॥ (5.2)

एवं च द्विपरार्धकालविगता वीक्षां सिसृक्षात्मिकां
बिभ्राणे त्वयि चुक्षुभे त्रिभुवनीभावाय माया स्वयम् ।
मायातः खलु कालशक्तिरखिलादृष्टं स्वभावोऽपि च
प्रादुर्भूय गुणान् विकास्य विदधुस्तस्यास्सहायक्रियाम् ॥ (5.3)

मायासन्निहितोऽप्रविष्टवपुषा साक्षीति गीतो भवान्
भेदैस्तां प्रतिबिम्बितो विविशिवान् जीवोऽपि नैवापरः ।
कालादिप्रतिबोधिताऽथ भवता संचोदिता च स्वयं
माया सा खलु बुद्धितत्त्वमसृजद्योऽसौ महानुच्यते ॥ (5.4)

तत्रासौ त्रिगुणात्मकोऽपि च महान् सत्त्वप्रधानस्स्वयं
जीवेऽस्मिन् खलु निर्विकल्पमहमित्युद्बोधनिष्पादकः ।
चक्रेऽस्मिन् सविकल्पबोधकमहन्तत्त्वं महान् खल्वसौ
सम्पुष्टं त्रिगुणैस्तमोऽतिबहुलंविष्णो! भवत्प्रेरणात् ॥ (5.5)

सोऽहं च त्रिगुणक्रमात् त्रिविधतामासाद्य वैकारिको
भूयस्तैजसतामसाविति भवन्नाद्येन सत्त्वात्मना ।
देवानिंद्रियमानिनोऽकृत दिशावातार्कपाश्यश्विनो
वह्नींद्राच्युतमित्रकान् विधुविधिश्रीरुद्रशारीरकान् ॥ (5.6)

भूमन्! मानस बुद्ध्यहंकृति मिलच्चित्ताख्य वृत्त्यन्वितं
तच्चान्तः करणं विभो! तव बलात् सत्त्वांश एवासृजत् ।
जातस्तैजसतो दशेन्द्रिय गणा स्तत्तामसांशात् पुनः
तन्मात्रं नभसो मरुत्पुरपते! शब्दोऽजनि त्वद्बलात् ॥ (5.7)

शब्दाद्व्योम ततः ससर्जिथ विभो! स्पर्शं ततो मारुतं
तस्माद्रूपमतो महोऽथ च रसं तोयं च गन्धं महीम् ।
एवं माधव! पूर्वपूर्वकलनादाद्याद्यधर्मान्वितं
भूतग्राममिमं त्वमेव भगवन् प्राकाशयस्तामसात् ॥ (5.8)

एते भूतगणास्तथेन्द्रियगणा देवाश्च जाता पृथङ्-
नो शेकुर्भुवनाण्डनिर्मितिविधौ देवैरमीभिस्तदा ।
त्वं नानाविधसूक्तिभिर्नुतगुणस्तत्त्वान्यमून्याविशन्
चेष्टाशक्तिमुदीर्य तानि घटयन् हैरण्यमण्डं व्यधाः ॥ (5.9)

vedam nadam

अण्डं तत्खलु पूर्वसृष्टसलिलेऽतिष्ठत् सहस्रं समाः
निर्भिन्दन्नकृथाश्चतुर्दशजगद्रूपं विराडाह्वयम् ।
साहस्रैः करपादमूर्धनिवहैर्निश्शेषजीवात्मको
निर्भातोऽसि मरुत्पुराधिप! स मां त्रायस्व सर्वामयात् ॥ (5.10)

॥ इति विराट्पुरुषोत्पत्तिः पञ्चम दशकम् संपूर्णम् ॥

vedam nadam